# VEDA-PARICAYAHA

Asst. Prof. Dr.C.Venkatesan M.A., M.Phil., Ph.D.,

P.G. and Research Department. of Sanskrit,

Rajah's College of Sanskrit and Tamil Studies,

Thiruvaiyaru - 613 204, Tamil Nadu

वेदपरिचयः

अथ वेदः इति - भारतदेशस्य प्राणभूता वेदाः। 'वेद' इति शब्दः 'विद्ज्ञाने' 'विद्सत्तायाम्' 'विद्लृलाभे' 'विद्विचारणे इत्येभ्यः चतुर्भ्यः धातुभ्यःनिष्पन्नः। वेदचतुष्टयं भवति, ऋक् वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः इति च।

ऋक् वेदः

रुच्यते श्रूयते यया सा ऋक्। तादृशीनां ऋचां समूह एव ऋग्वेदः। यत्र अर्थावसेन पादव्यस्था सा ऋग् इति मीमांसकाः। तैत्तरीयसंहितानुसारेण यज्ञस्य यत् विधानं क्रियते, तत्तु शिथिलं परं. ऋग्वेदेन विहितानुष्ठानं दृढं भवति। यद्यपि महाभाष्ये ऋग्वेदस्य विभागाः एकविंशतिकाः निर्दिष्टाः, तथापि शाकल-बाष्कल-आश्वलायन-सांख्यायन-माण्डुक्यायन नामाध्यायाः पञ्चशाखाः निर्दिष्टाः मुख्याः|

ऋग्वेदः - सूक्तः - मण्डलम् च भेदेन द्विधा विभज्यते। सूक्तं चतुर्विधं यथा-ऋषिः, देवता,छन्दः,अर्थः इति। ऋषिदृष्टमन्त्राणां समूह ऋषिसूक्तं, देवतार्थमन्त्राणां समूहः देवतासूक्तं, सामान्यछन्दसां मन्त्राणाम् समूह छन्दस्सूक्तम् ।अर्थमन्त्राणां समूह अर्थसूक्तम्। ऋग्वेदः मण्डलानुवाकभेदेन अष्टकाध्यायभेदेन च द्विधा। ऋग्वेदसंहितायां दशमण्डलानि, पञ्चाशीत्यनुवाकाः अशीत्यधिकपञ्चाशतोत्तरदशसहस्त्रं मन्त्राः सन्ति| यमण्डलादारभ्यः - सप्तमण्डलपर्यन्तं विशिष्टकुलऋषीणां प्रार्थना संकलिता अस्ति। अष्टममण्डले अधिकतराः मन्त्राः कण्वऋषीणा सह सम्बन्धाः सन्ति। नवममण्डले पवमानस्य अर्थात् सोमस्य विषये विभिन्नैः ऋषिकूल्यैः मन्त्राणां संग्रहोऽस्ति। ऋग्वेदीयदेवतासु त्रयः देवताः स्ववैशिष्ट्येन प्रसिद्धाः सन्ति। यास्कः वदति यत् देवतासु काश्चन पृथ्वीस्थानीयाः काश्चनान्तरीक्षस्थानीयाः काश्चनद्विस्थानीयाः सन्ति। यथा-अग्नी-इन्द्र- सूर्य-वरुणप्रभृतिदेवाः दशममण्डलं सर्वतिर्वाचितं वर्तते। अस्मिन् मण्डले अनेकानि विविधदार्शनिकसूक्तानि, भौतिकसम्बन्धानि, आध्यात्मिकविचारधारायाः संकलितानि च सूक्तानि सन्ति। दशममण्डलेन केवलं देवतासूक्तयः अपितु तदभिन्नाः अपि मन्त्राः दृश्यन्ते। ऋग्वेदे मन्त्रद्रष्टारः विश्वामित्र -वामदेव - अत्रि- भरद्वाज- वसिष्ठादयः सन्ति। अत्र कालभेदेन मन्त्रभेदः जायते।

यजुर्वेदः

चतस्रस्वपि संहितासु यजुस्संहितातीव महत्वपूर्णा अस्ति। यजुर्वेदे सर्वविधयागयज्ञादीनां वर्णनं विद्यते। यजुस्संहिता कृष्ण- शुक्ल भेदेन द्विधा । शुक्ल यजुर्वेदं विनियोगवाक्यरहिताः केवलं मन्त्राः विद्यन्ते। अर्थात् यत्र मन्त्राणामेव विशुद्धतया प्रतिष्ठानं कृतं सः शुक्लयजुर्वेद इति। कृष्णयजुर्वेदे तु विनियोगवाक्ययुक्ताः मन्त्राः। अर्थात् मन्त्र- ब्राह्मणयोः द्वयोः अपि यत्र मिश्रभावः कृतः सः कृष्णयजुर्वेद इति ।

परन्तु पौराणिकाः कथयन्ति, व्यासः वैशम्पयानाय वेदं प्रोवाच । स च स्वशिष्याय याज्ञवल्क्याय तददात्।परं केनापि कारणेन रुष्टः सन् वैशम्पायनः याज्ञवल्क्यः गुरुवचनं पालयन् तदधितस्य वेदस्य सद्यो वमनं कृतवान्। अन्त्यवैशम्पायनस्य शिष्याः तित्तिरिरूपं धृत्वा याज्ञवल्क्येन वमितं वेदं गृहीतवन्तः। स एव वान्तगृहीतः वेदः कृष्णयजुर्वेदः इति। शुक्लयजुर्वेदस्य शाखाद्वयम् अस्ति।ते च माध्यन्दिनी शाखा, कण्वशाखा। कृष्णयजुर्वेदस्य सम्प्रति पञ्चाशीतिशाखासु केवलं महाराष्ट्रे चतस्रः शाखाः समुपलभ्यन्ते। ताः यथा तैत्तेरीय -मैत्रायणी-काठक-कपिष्ठकशाखाः।अध्वर्युनां यज्ञे उपयुज्यमानाः मन्त्राः यजुर्वेदे संकलिताः। यजुश्शब्दस्य व्याख्याः आपाततः भिन्नाः प्रतीताः भवन्ति। स तत्र एकमेव लक्षणं प्रति संकेतं मिलति। यथा "अनियताक्षरावसाने यजुः" अर्थात् यत्र अक्षराणां संख्या नियता नास्ति तत् यजुः सोऽयं यजुर्वेदः इति। तत्र चत्वारिंशदध्यायाः ३०३ अनुवाका १९७५ मन्त्राः २९६२५ शब्दाः ८८८७५ अक्षराणि च विद्यन्ते।अस्य वेदस्य प्रथमाध्याये दर्शपौर्णमासाः द्वितीये च विद्यन्ते। -

अस्य वेदस्य प्रथमाध्याये दर्शपौर्णमासाः, द्वितीये च चातुर्मास्य इति। चतुर्थाऽध्यायाद् अष्टमोऽध्यायायं यावत् अग्निष्टोमविधानं सोमयागश्च।नवमे वाजपेयः राजसूयश्च। एकादशाद् अष्टादशपर्यन्तं अग्निचयनम्। एकोनविंशतितमाध्यायात् परिशिष्ट आरभ्यते। विंश- एकोनविंशाध्याययोः च सोमसम्पादनविधिः। तदनु पितृमेधादिविवरणं वर्णितम्। अन्तिमोऽध्यायः ईशावास्योपनिषद्रूपः।

सामवेदः

चतस्रस्वपि संहितासु सामसंहिता परमगौरवशालिनी वर्तते। गीतायां भगवान् कृष्ण आह "वेदानां सामवेदोस्मि" इति। सामवेदस्याभिप्रायमस्मि गानपूर्वकम् उपासनम्। ऋग्वेदे अथर्ववेदे आपि च सामवेदस्य प्रशंसा मिलति।

सामवेदस्य प्रयोगः द्वयोः अर्थयोः एव मिलति। ऋक्मन्त्राणाम् उपरि गायनमेव वस्तुतः सामशब्दः। ऋक्मन्त्रेभ्योऽपि सामशब्दप्रयोगः मिलति। पूर्वमेव आवश्यकतानुसारेण विविधस्वरविदितं यत् सामसंहितायाः संकलन् उद्गातृणां कृते ऋत्विग्भिः कृतम् अस्ति। अयम् उद्गाता देवतायाः स्तुतिपरकमन्त्रान् एव ऋक्षु गायति । अतः सामवेदस्य आधारः ऋक्मन्त्राः एव इति निश्चितम्। सामवेदस्य द्वौ प्रधानौ भागौ स्तः। आर्चिकं तथा गानम् इति।आर्चिकस्यशव्दार्थावस्ति ऋग् समूहः। सोऽपि द्विधा विभज्यते। पूर्वार्चिकम् - उत्तरार्चिकं चेति। पूर्वार्चिकम्एव छब्दः छन्दसि छन्दसिका इति त्रिभिः नामभिः अभिधीयते।विषयानुसारं पूर्वार्चिकं चतुर्षु भागेषु विभज्यते।यथा-आग्नेयपर्वः ऐन्द्रपर्वः पवमानपर्वः आरण्यकपर्वःचेति। पूर्वार्चिके षट्प्रपाठकाः सन्ति। यज्ञे चत्वारः ऋत्विजः भवन्ति। ते हि यज्ञावसरे देवतान् आह्वयन्ति।

अध्वर्युः विधिवत् यज्ञं सम्पादयति । तत्र आवश्यकमन्त्राः यजुषि। तेषां संग्रहः यजुर्वेदः। उद्गाता उच्चस्वरेण गानकर्ता। स हि स्वर-मन्त्रान् उच्चैः गायति । तदपेक्षितमन्त्रसंग्रहः सामवेदः ब्रह्मा यज्ञनिरीक्षकः।कृत्याकृत्यावेक्षमन्त्रसंग्रहः सामवेदः। ब्रह्मा यज्ञनिरीक्षकः।अथर्ववेद इतिकथ्यते।सामवेदान्तर्गतमन्त्राणां सप्तस्वराः। ऋग् वेदे पुनः तेषां मन्त्राणां त्रय एव स्वराः।

अथर्ववेदः

अभिचारक्रियायाः प्राधान्येन तथा अथर्वणनामर्षिणा सृष्टत्वात् अथर्ववेद इत्युच्यते। अथर्ववेदे विंशतिः काण्डनि, ७३१ सूक्तानि,५९८७ मन्त्राः प्रायशः द्वादशशतम् ऋग्वेदे दृश्यन्ते। विंशकाण्डे १४३ सूक्तानि सन्ति। तेषु सूक्तानि विहाय शेषानि सर्वाण्यपि ऋग्वेदस्य सप्तममण्डले प्राप्यन्ते। अथर्ववेदस्य नव शाखाः आसन्। परन्तु शाखाद्वयं प्राप्यन्ते। प्रचलितार्थवसंहिता शौनकशाखान्तर्गता। अथर्ववेदस्य एकपञ्चमांशमन्त्राः ऋग्वेदीयमन्त्राः इव सन्ति। विशेषतः प्रथम -अष्टम-दशम-मण्डलेषु एते मन्त्राः मिलति। प्राचीनमानव समाजस्य क्रियाकलापानुष्टानविकासादीनां बृहच्चित्रणम् अत्र वैदिकसाहित्ये अनुपलब्धं सदति अथर्वसंहितायां समुपलब्धम् अस्ति।शत्रुजयनिमित्तं क्लिष्टरोगनिवारणार्थं सद्य जातबालकानां मातुः सन्तापकारभूतप्रेतादिविनाशार्थं विविधाभिचाराणां विचित्रवर्णनं अथर्ववेदे दृश्यते। मानवशास्त्राणाम् अभ्यासनिमित्तं वेदोऽयं विश्वकोष इव अस्ति।